The Adyar Library Series—No. 32

ĀLAMBANAPARĪKSĀ

ĀLAMBANAPARĪKṢĀ

AND

VṚTTI

BY

DIṄNĀGA

WITH THE COMMENTARY

OF

DHARMAPĀLA

Restored into Sanskrit from the Tibetan and Chinese Versions and edited with English Translations and Notes and with copious extracts from Vinītadeva's Commentary

BY

N. AIYASWAMI SASTRI

S. V. S. COLLEGE, TIRUPATI

(Honorary special Editor of Tibetan and Chinese Texts, "Brahmavidyā", Adyar, and formerly Professor of Buddhist Studies, Santiniketan)

THE ADYAR LIBRARY

1942

Price Rs. 3-8-0

Printed by
C. SUBBARAYUDU,
AT THE VASANTA PRESS,
ADYAR, MADRAS.

Dedicated

To

THEM

Who laboured for the cause of cultural and spiritual advancement of all living beings

CONTENTS

PREFATORY NOTE

In the scheme of publications planned for the Adyar Library, Buddhistic literature forms one important branch of study. Special attention has been paid in recent years to the study of Tibetan and Chinese versions of certain Buddhistic Texts in Sanskrit which had been lost and could only be reconstructed on the basis of their Tibetan and Chinese versions. The *Bhavasaṅkrānti-sūtra and Nāgārjuna's Bhavasaṅkrānti śāstra* published by the Adyar Library in 1938, under the editorship of Paṇḍit N. Aiyaswami Sastri, were our first attempts in the direction of such restoration.

Encouraged by the reception which the *Bhavasaṅkrānti-sūtra* received at the hands of the scholars, we are now issuing the second of the series, the *Ālambanaparīkṣā and Vṛtti* of Ācārya Diṅnāga under the same editorship. A fortunate circumstance has preserved this important Buddhistic work in their Chinese and Tibetan versions while the Sanskrit original has been lost. The *Journal Asiatique* (Vol. CCXIV, No. 1) contains a French translation of this work with copious extracts from the commentary of Vinītadeva under the joint efforts of Mr. Susumu Yamaguchi of Japan and Henry Meyer of Paris. For increasing its usefulness, it was felt necessary to have the treatise reconstructed into Sanskrit along with an English translation. Paṇḍit Aiyaswami Sastri who is eminently fitted for the task, kindly undertook to prepare and edit the work and has now carried it through to a successful completion. In the

present edition, he has incorporated all the salient features of the French translation including the extracts from the commentary of Vinītadeva and has also gone much farther. The Commentary of Dharmapāla in the Chinese version of I-tsing has been rendered into both Sanskrit and English and incorporated in this edition. It is noteworthy that this Dharmapāla is earlier in point of time to Vinītadeva. He is further stated to be different from his South Indian namesake who lived near Negapatam. Valuable information on Diṅnāga is also presented in the Editor's preface. It is hoped that the 'Additional Notes' and four Appendixes will be helpful to students of research on the subject.

The need for a reorientation of Indological studies from the point of view of cultural contact with the Far East and China, has not yet been adequately provided for in our country. Only a few institutions and Universities have made provision for the study of Tibetan and Chinese Literature and fewer still for original research. It is earnestly hoped that our Universities and other cultural centres will realize the imperative need for providing for this branch of study as early as possible. A chair in each University to promote the study of the cultural contributions of the literature of the Far Eastern countries may well be expected to open up new and fascinating fields of research.

It is with great pleasure that I record here our obligations to Paṇḍit N. Aiyaswami Sastri for placing his most valuable and scholarly services at the disposal of the Library, freely and generously.

Adyar — G. SRINIVASA MURTI,
7th April, 1942. — *Honorary Director.*

PREFACE

THE Alambanaparīkṣā is one of the smaller treatises on the selected subjects composed by Ācārya Diṅnāga, the father of mediæval Indian logic. The treatise, as its title denotes, starts an enquiry about the true nature of the *ālambana*, object of consciousness. The author, after a thorough examination of the standpoints of the Realists such as Vaibhāṣikas, Vais'eṣikas and others who hold the external things to be real, and proving their views untenable, establishes that the *ālambana*, as it appears to us, is unreal and that consciousness alone is real—a dogma which has been held by his predecessors, Asaṅga and Vasubandhu, two eminent teachers of the Yogācāra school of Buddhism. The main contribution of Diṅnāga to that school in his present treatise lies in putting the dogma on a logical basis.

This position of the author provoked a vehement protest from the dialecticians of the opposite camp, more specially Kumārilabhaṭṭa and S'aṅkarācārya, two great thinkers and up-holders of the Brāhmanical tradition and culture. According to Yogācāras, only the pure consciousness appears into subject and object; and there exists, for them, nothing external apart from consciousness. What causes consciousness to arise is only its part known as *grāhyabhāga*, knowable aspect, and

the same is regarded as the object-cause (*ālambana-pratyaya*). The opponent asks: "How can a part of consciousness and appearing simultaneously be a condition to the consciousness itself?" Dīṅnāga answers this question in two ways. The first answer is: It is, though simultaneous, a condition, because it is associated invariably with consciousness: प्रत्ययो ऽव्यभिचारित्वात् सह. The second answer is: It becomes also a condition in succession by transmitting the force (*s'akti*): शक्त्यर्पणात् क्रमात् ॥ (*Ālam. parīkṣā*, 7 a-b). Both these answers, according to Kumārila, are unsatisfactory and do not stand the strict scrutiny of the logicians. So he takes up the question for an impartial investigation and proves invalidity of those arguments of Dīṅnāga in these verses:

अन्योन्यनिरपेक्षत्वाद्युगपच्चापि जन्मनि ।
मानमेयत्वनास्तित्वं क्रियाकारकवर्जनात् ॥ etc.
· न च शक्त्यर्पणद्वारं क्रमेणालम्बनं भवेत् । etc.

(*S'lokavārtika*, *S'ūnyavāda*, 150-158 and 158-167). Similarly S'aṅkarācārya[1] also has, in his Bhāṣya on the Brahmasūtras, summarized and demolished the whole structure of Dīṅnāga's arguments found in the present work; and in doing so he quotes this line: यदन्तर्ज्ञेयरूपं तु बहिर्वदवभासते। (*Alam. par.* 6 a-b) in the course of setting forth his own *siddhānta*. Similar criticisms

[1] See my paper on "Saṅkarācārya on Buddhist Idealism" published in the Journal of Sri. Ven. Orien. Inst., Tirupati. Vol. I, part 3, pp. 71—85, where I have studied the Bhāṣya in the light of original Buddhist sources.

are also met with in the works of Udyotakara, (*Nyāya-vārtika*), Vācaspatimiśra (*N. tātparyaṭīkā*) and Śālikanātha (*Prakaraṇapañcikā*) and others. I, therefore, need not say how thought-provoking and epoch-making the treatise was in those days. Their arguments and counter-arguments will be more understandable, if one could get acquainted with the present work. Further, the work, as it is stated, forms one of the author's original contributions to the logic-minded Yogācāra school of Buddhism. All these circumstances necessitate us to undertake the publication of the present treatise.

It is most unfortunate that such an important work should have been lost to us in its original Sanskrit, though available in translations of foreign languages, Chinese and Tibetan. The work has two commentaries, one by Dharmapāla of Nālandā, preserved in Chinese version of I-tsing, and the other by Vinītadeva available in Tibetan version. Mr. Susumu Yamaguchi in collaboration with H. Meyer has translated into French and published in the *Journal Asiatique* T. CCXIV, (Jan.-March, 1929) this work with copious extracts from the commentary of Vinītadeva, and also edited the Tibetan and Chinese versions of the text. But he did not study systematically the commentary of Dharmapāla. I have restored into Sanskrit this important treatise, text with author's own *vṛtti* from the Tibetan version (Tang. ḥgyur. vol. Ge, XCV), with the commentary of Dharmapāla from the Chinese version of I-tsing, A.D. 671-695 (Nanjio, No. 1174, Taisho ed. vol. 31, No. 1625) and also translated them all into English. Dharmapāla's

commentary is incomplete and abruptly breaks off in the seventh verse. I have added to my English translation of the text almost all important portions of Vinītadeva's comment translated into English from its French translation of S. Yamaguchi and H. Mayer. There are two translations in Chinese of the text, one by Paramārtha (Nanjio, No. 1172, Taisho ed. vol. 31, No. 1619; Shanghai ed. "lai" part 10, pp. 13-14) and the other by Hiuen Tsang (Nanjio, No. 1173, Taisho ed. vol. 31. No. 1924, and Shanghai ed. "lai" part 10, pp. 12-13). Literal Sanskrit renderings of these two versions are made and printed in parallel columns so that the readers may themselves note their differences. For preparation of the edition of this work of Diṅnāga, I have made use of the above specified and other reference books of the Adyar Library which is one of the richest and well-equipped Libraries of India, and more specially so in regard to rare collections of Buddhist literature including Tibetan and Chinese. I have only consulted for Dharmapāla's comment the Nanking edition of the Chinese version of I-tsing in my possession.[1] Romanised Tibetan text of the treatise has also been added at the end with a view to facilitating the beginner in these studies. As no printing facilities are available in the Press, I refrain from publishing any Chinese portion or word-index in Chinese of the work.

[1] A copy of this edition was presented to me by my friend and student Mr. Shilu of China during my stay at Santiniketan in 1938-1939.

Before closing this short preface, it will not be out of place to say a few words about the author and his commentators. The following accounts of Diṅnāga are narrated by the Chinese traveller, Hiuen Tsang:

"Above twenty *li* further south west of the monastery of Achala near the capital of Pundhra was an isolated hill on the ridge of which was a stone tope where Chenna (= Diṅnāga) Pusa composed a *Yin-ming-lun* or a treatise on logic. The pilgrim then relates about the circumstances connected the production of this S'āstra in exposition of Buddha's teaching on *Yin-ming*. Chenna, the pilgrim relates, after the Buddha departed from this life, came under his influence, and and entered the Order. The aspirations of his spiritual knowledge were vast and his intellectual strength was deep and sure. Pitying the helplessness of the state of his age he thought to give expansion to Buddhism. As the S'āstra on the Science of Inference was deep and terse, and students wrought at it in vain, unable to acquire a knowledge of his teachings, he went apart to live in calm seclusion to examine the qualities of the writings on it and investigate their characteristics of style and meaning. Hereupon a mountain-God took the Pusa up in the air and proclaimed that the sense of *Yin-ming-lun* originally uttered by the Buddha, had been lost and that it would, that day, be set forth at large again by Chenna. This latter sent abroad a great light which illuminated the darkness. The sight of this light led to the King's request, that Chenna should at once

having incurred displeasure of his teacher, he was expelled, and he then joined the school of Vasubandhu. Then he lived for some time in a cave on Bhora S'aila in Odivis'a, sojourned in Nālandā, where he disputed successfully with several defenders of various schools and afterwards returned to Odivis'a. Here he resolved to devote himself to the compilation of a treatise on logic, and the resolve was followed by an earthquake, a great light and a noise in the air. When he began to despair of success in his understanding, Mañjus'rī appeared to him, and roused him to renewed application by advice and encouragement. The king of the country also became of his friend and patron." (v. On Yuan Chwang's travels in India, Vol. II, p. 212).

From the above narratives we may conjucturally construe his life as below: He was born in a Brahmin family in a suburb of Kāñcī, then capital of Pallava kings in South India. Being educated in the orthodox teachings of Brahmins and Buddhists, he joined first the Vātsīputrīya sect of Buddhists. Being unsatisfied with its teachings he started for search of truth and finally came to Vasubandhu in Nālandā and studied with him the logic and Vijñānavāda. He composed there several smaller treatises such as commentary on the *Abhidharmakos'a*, the *Ālambanaparīkṣā*, *Nyāyamukha* and others. After retirement from Nālandā, he settled in a cave on Bhora S'aila in Odivisa and also frequently staying in Achala's monastery (=Ajanta caves) where he composed his *Pramāṇasamuccaya*, the standard treatise

on the Buddhist logic. His date may roughly be fixed about 400 A.D., as he is stated to have studied with Vasubandhu in Sri Nālandā, whose life-period has been fixed as c. A. D. 280 to 360 by V. A. Smith (History of India, 3rd ed. p. 328) on the authority of N. Peri (Bulletin de L'Ecole France d'Extreme Orient, t. XI, pp. 339-90).

Turning to Dharmapāla, his commentator, I should, at the outset, like to stress on one point, namely that he is not to be confounded with a person of his namesake *viz.*, Dharmapāla of the Theravāda school. The latter is said to be a resident of Badaritittha (v. *Visuddhimaggaṭīkā*, colophon) which is simply stated in the *Sāsanavaṁsa* to have been situated in the country of Damiḷa, not far from the island of Ceylon (P.T.T. edn. p. 33). However, the latest Archaeological finds help us to identify it with some place near Negapatam, a small seaport town in South India. The present commentator, Dharmapāla is nowhere mentioned to have been connected any way with Badaritittha. He, on the other hand, is stated to have fled away from Kāñci towards the north in his youth and remained there until his death. I have discussed at length all the points relating to the persons and dates of these two Dharmapālas in a separate paper entitled "On Dharmapāla" published in the Journal of Sri Venkatesvara Oriental Institute, Tirupati, (Vol. II, part 2, p. 347 ff.). The following accounts of the life of the present Dharmapāla are narrated by the Chinese traveller:

"The capital (Kāñci) was the birth-place of Dharmapāla who was the eldest son of a high official of the city. He was a boy of good natural parts which received great development as he grew up. When he came of age a daughter of the King was assigned to him as wife, but on the night before the ceremony of marriage was to be performed, being greatly distressed in mind he prayed earnestly before an image of Buddha. In answer to his prayer, a god bore him away to a mountain monastery some hundreds of *li* from the capital. When the Brethern of the monastery had his story told, they complied with his request and gave him ordination and the king on ascertaining what had become of him, treated him with increased reverence and distinction." (v. T. Watters, *op. cit.* p. 226). The direction to which he fled on the eve of distress is not mentioned there; yet we may assume that it was North where he spent major part of his life.

It is stated that he drew up the following works: *S'abdavidyāsaṁyuktas'āstra* in 25,000 s'lokas; a commentary on the *S'atasāstravāipulya*; on the *Vidyāmātrasiddhi*; and on *Nyāyadvāratarkas'āstra* (= *Nyāyamukha* of Diṅnāga). The first of the above four works seems to be the same as the commentary on Bhartṛhari's treatise called *pei-na*, mentioned by I-tsing. Takakusu suggests that *pei-na* is probably 'Beda' or 'Veda.' But this is improbable, because Bhartṛhari is unknown to have composed any treatise on Veda, and much more so, that Dharmapāla should have commented upon it. So it may, perhaps, be *Vyākaraṇa*.

This commentary and the commentary on *Nyāyamukha* are not now available. Nanjio's Catalogue mentions four works in his credit: (1) *Ālambanaparīkṣāvyākhyā* No. 1174, (2) *Vidyāmātrasiddhi* No. 1197, (3) *Sata-sāstravaipulyavyākhyā* No. 1198, (4) *Vidyāmātrasiddhi-śāstra No.* 1210.

As regards his date, I-tsing A.D. 671-695 speaks of him as contemporary of Bhartṛhari who, according to the same Chinese authority died in about A.D. 651-52. It is also believed that he was the elder contemporary of Dharmakīrti who flourished in the middle of the 7th century A.D., and that the latter was the pupil of the former. In the present commentary of Dharmapāla, there are two quotations, both agreeing in spirit with the verses of *Pramāṇa-vārtika* of Dharmakīrti (v. pp. 61, 67). It is not certain whether the former quotes from the latter or they both cite them from a common source.[1] This Dharmapāla seems to be the same as the teacher of S'īlabhadra who received Hiuen Tsang at Nālandā in 635 A.D. (v. Takakusu, Record of the Bud. Religion by I-tsing, XIV). Prof. H. Ui has, however, fixed 539-70 A.D. as Dharmapala's palmy days on the authority of Kwechi's commentary on the *Vijñaptimātratāsiddhi* which is reported to have stated that Dharmapāla died in the 32nd year of his age and was one year younger

[1] Instances are not lacking to make us believe that Dharmakīrti's *Pramāṇavārtika* contains quotation from some earlier works; *e.g.*, the verses आत्मनि सति परसंज्ञा, etc., of the *Ratnāvali* of Nāgārjuna (ed. G. Tucci. in Journal of R.A.S. 1934, April) found in the *Pram.-vārtika*, L. 221, p. 87.

than S'īlabhadra. This S'īlabhadra, says H. Ui, was, according to the *Siyuki* of Hiuen Tsang, 30 years old while studying with Dharmapāla, and was 106 years old when Hiuen Tsang met him. The Chinese pilgrim started from China in 629 A.D. and arrived at Rājagṛha and saw him in 633 A.D. So Dharmapāla was still living in 557 A.D. These are circumstances which prompted H. Ui to arrive at the opinion in regard to the date of Dharmapāla above stated (v. Vais'eṣika Philosophy, p. 10). Though the tradition of Kwechi and others is earlier and more trustworthy, yet it is not supported by I-tsing and the Tibetan authorities, (*e.g.*, Tārānātha, pp. 161-2). Therefore we may, as it has been stated above, assign our commentator to the second quarter of the 7th Century A.D. (cf. *Tattvasaṅgraha*, Intro. xcv).

Scholars will themselves see how lucid, and elucidative his commentary is even in the translation of so linguistically unfamiliar and foreign language as Chinese, and how much more useful purpose would have been served, if the Sanskrit original of it were recovered. It is also equally regrettable that the commentary is incomplete.

As for Vinītadeva, the other commentator, we know very little of his life, and we have to content ourselves with what Tārānātha briefly remarks: "Zu der zeit liebten die Zauberkundigen: Konig Sahajavilāsa (*Lhan.skyes.rol.pa*), in Sri Nalanda der Ācārya Vinītadeva (er verfasste einen commenter zu dem Pramāṇa in Sieben Abtheilungen), der Sautrāntika S'ubhamitra and der Ācārya S'īlapālita," . . . (Schiefner's translation,

p. 197-8). He was a great logician and commentator of his time, and was one of the gems of Nālandā University. He is said to have flourished in about 700 A.D. His commentary on the present treatise is very learned and helpful to understand fully the position and motive of Diṅnāga in writing the present work. Almost all important portions of this commentary have been translated into French by S. Yamaguchi and H. Meyer from its Tibetan translation, and again translated into English by me and added as notes to my English translation of the treatise.

In concluding the preface I should offer my sincere thanks to the authorities of the Adyar Library, especially the Director, Dr. G. Srinivasamurti, B.A , B.L., M.B. & C.M., Vaidyaratna, and the Editor Dr. C. Kunhan Raja, M.A., D. Phil. (Oxon.) for kindly publishing this book in the Adyar Library Series. I should like also to thank M. Bhikshu Ārya Asaṅga (formerly A. J. Hamerster) Jt. Director and Curator for the Western section of the Library for the help he has kindly rendered by going through some portions of my English translation of the French passages. However, I must say that I hold myself responsible for those portions as printed in this volume.

N. AIYASWAMI SASTRI

Substitute the following for the verse *7a-b* on page 2, line 5 and p. 6, ll. 7 and 11:

प्रत्ययोऽव्यभिचारित्वात् सह शक्त्यर्पणात् क्रमात् ।

(cited by Pārthasārathi Mis'ra in his comment on S'lokavārtika, pp. 311 and 312.)

आलम्बनपरीक्षा*

आचार्यदिङ्नागकृता

नमः सर्वबुद्धबोधिसत्त्वेभ्यः

१. यद्यपीन्द्रियविज्ञप्तेर्बाह्यांशः (=अणवः) कारणं भवेत् ।
अतदाभतया तस्या नाक्षवद्विषयः स तु[1] (अणवः) ॥

२. यदाभासा न तस्मात् सा द्रव्याभावात् द्विचन्द्रवत् ।
एवं बाह्यद्वयञ्चैव न युक्तं मतिगोचरः ॥

३. साधनं सञ्चिताकारमिच्छन्ति किल केचन[2] ।
अण्वाकारो न विज्ञप्तेरर्थः[3] कठिनतादिवत् ॥

४. भवेद्धटशरावादेस्तथा सति समा मतिः ।
आकारभेदाद्भेदश्चेत्, नास्ति तु द्रव्यसत्यणौ ॥

* Tanjur (Narthan), Mdo, ce, (XCV) No. 4.

[1] This verse is quoted in the Tattvasaṅgrahapañjikā (GOS.) p. 582. The reading 'अणवः' given within bracket is according to the Tibetan version.

[2] This line being put literally, may read thus: केचित् सञ्चिताकारान् साधनमिच्छन्ति ।

[3] Lit. विज्ञप्ति-अर्थ.

५. प्रमाणभेदाभावात् सः[4]. अद्रव्येऽस्ति ततः स हि ।
अणूनां परिहारे हि तदाभज्ञानविप्लवात्[5] ॥

६. यदन्तर्ज्ञेयरूपं तु बहिर्वदवभासते ।
सोऽर्थो विज्ञानरूपत्वात्तत्प्रत्ययतयापि च[6] ॥

७. एकांशः[7] प्रत्ययोऽवीतात्[8] शक्त्यर्पणात्क्रमेण[9] [वा] ।
सहकारिवशाद्यद्धि शक्तिरूपं [तत्] इन्द्रियम् ॥

८. सा [illegible] विज्ञप्तेरेवं विषयरूपकम् ।
प्रवर्ततेऽनादिकालं शक्तिश्चान्योन्यहेतुका ॥

इत्याचार्यदिङ्नागकृता आलम्बनपरीक्षाप्रकरणकारिका समाप्ता

---

[4] The two quarters 4*d* and 5*a* form one idea, and they may be put literally thus : सः अणौ द्रव्यसति नास्ति प्रमाणभेदाभावात्.

[5] This may literally read thus अणु परिहारे तदाभज्ञानविप्लवः. The reading 'विप्लवात्' is adopted from the Tibetan version of the Vṛtti.

[6] This verse is quoted in the Tattvas. pañ. p. 582. Mr. S. Yamaguchi suggests in Tib. 6*b* the reading 'de' for 'te' relying upon Vinitadeva's commentary (Tib.). It is also supported by the Sanskrit original. The first half of this verse is cited by S'aṅkara in his Bhāṣya ad II, 2, 28, with the reading 'तत्' for 'तु'.

[7] = gcig. cha haṅ. So reads S. Yamaguchi's edition of the Tib. version. But the Xylograph reads gcig. nahaṅ=एकोऽपि.

[8] =अविनाभाव=अव्यभिचार=mi (ma) hkhrul.

[9] This quarter is cited in the Tattvasaṅ. pañ. p. 582 along with the prose passage of the Vṛtti thus : अथ वा शक्त्यर्पणात्क्रमेणापि, etc.

आलम्बनपरीक्षावृत्तिः *

आचार्यदिङ्नागकृता

नमः सर्वबुद्धबोधिसत्त्वेभ्यः

ये चक्षुरादिविज्ञानस्यालम्बनं बाह्यार्थोऽस्तीतीच्छन्ति । ननु ते कल्पयन्ति परमाणून् ; तत्कारणत्वात [ज्ञानस्य] । संघातं[1] वा तदाभज्ञानस्य जायमानत्वात् । तत्र तावत्

यद्यपीन्द्रियविज्ञप्तेर्ग्राह्यांशः (=अणवः) कारणं भवेत् ।
अतदाभतया तस्या नाक्षवद्विषयः स तु (अणवः) ॥ १ ॥

विषय इति । ज्ञानेन स्वरूप [मेव] निर्धार्यते । तदाकारतया[2] जायमानत्वात् । [3]यद्यप्यणवः तत्कारणम् । तथापि न तादृशाः अक्षवत । एवञ्च नाणवस्तावदालम्बनम् । संघातस्तु तदाभत्वेऽपि [ज्ञानस्य. नालम्बनम् । यतः]

* Tanjur (Narthan), Mdo. ce (XCV) No. 5. The Tibetan version has been edited by Mr. Susumu Yamaguchi with French translation in the Journal Asiatique T. CCXIV, No 1 (1929).

[1] hdus. pa.

[2] Lit.-कारेण जननात .

[3] This sentence may also read thus : अणूनां तत्कारणत्वेऽपि न तथाभावः अक्षवत्.

यदाभासा न तस्मात्सा

योऽर्थः स्वावभासिविज्ञप्तिमुत्पादयति सह्यालम्बनं युज्यते । यतः स एव ह्युत्पत्तिप्रत्यय उच्यते । संघातस्तु नैवम् ।

द्रव्याभावाद् द्विचन्द्रवत् ।

इन्द्रियवैकल्यात् द्विचन्द्रदर्शनस्य तदाभत्वेऽपि न तस्य विषयोऽस्ति । तद्वत् संघातः द्रव्यतोऽसत्त्वेन अकारणत्वात् नालम्बनम् ।

एवं बाह्यद्वयञ्चैव न युक्तं मतिगोचरः ॥ २ ॥

अणुः कलापश्चेति बाह्योऽर्थः नालम्बनम्, एकाङ्गवैकल्यात् ॥ तत्र

साधनं सञ्चिताकारमिच्छन्ति किल केचन[4] ।

सर्वोऽर्थो बह्वाकारः[5] अतः तत्र केनचिदाकारेण प्रत्यक्ष इष्यते । परमाणुष्वप्यस्ति सञ्चिताभज्ञानोत्पत्तिकारणभावः[6] ।

अण्वाकारो न विज्ञप्तेरर्थः कठिनतादिवत् ॥ ३ ॥

[4] Representative of this view in later periods seems to be Bhadanta S'ubhagupta; cf. Tattvas. pañ. p. 551: समुदिता एवोत्पद्यन्ते विनश्यन्ति चेति सिद्धान्तात् नैकैकपरमाणुप्रतिभास इति । यथोक्तं भदन्तशुभगुप्तेन— प्रत्येकपरमाणूनां स्वातन्त्र्येणास्ति संभवः (Read असंभव) । अतोऽपि परमाणूनामेकैका-प्रतिभासनम् ।

[5] =rnam. pa. du. ma. can. yin. pas. So reads S. Yamaguchi's edition. But the Xylograph reads simply 'yin pas'.

[6] Cf. the opinion of Sumati, a Digambara, cited in the Tattvas. pañ. p. 554: सामान्यविशेषात्मत्वात् सर्वपदार्थानां तुल्यातुल्यरूपेण द्विरूपाः परमाणवः । तत्र समानं यद्रूपं तदिन्द्रियैर्गृह्यते नासमानम् । ततश्चैकाकारं विज्ञानमणुष्वविरुद्धमिति प्रत्यक्षसिद्धाः परमाणवः ।

यथा कठिनतादि विद्यमानमपि न चाक्षुषबुद्धिविषयः । [7]एव-मणुत्वमपि ॥

भवेद्घटशरावादेस्तथा सति समा मतिः ।

घटशरावादिपरमाणुषु बहुष्वपि न कोऽपि विशेषोऽस्ति ।

आकारभेदाद्भेदश्चेत्.

यदि मन्यसे ग्रीवाद्याकारः विशेषक्रिया. येन बुद्धेर्विशेषणमुपाधि-र्भवेत् । इति । अयमुपाधिर्घटादावस्ति ।

नास्ति तु द्रव्यसत्यणौ ॥ ४ ॥

प्रमाणभेदाभावात् सः.

परमाणुषु द्रव्यान्तरेष्वपि पारिमाण्डल्ये भेदो नास्ति ।

अद्रव्येऽस्ति ततः स हि ।

आकारभेदः संवृतिसत्स्वेवास्ति न तु परमाणुषु । घटादयश्च संवृतिसन्त एव ॥

अणूनां परिहारे हि तदाभज्ञानविप्लवात् ॥ ५ ॥

द्रव्यसत्सु [9]अपनीतसम्बन्धिष्वपि [नील-] वर्णादिवत् स्वबुद्धिर्न त्यज्यते । तथा सति इन्द्रियबुद्धीनां विषयो बहिर्नास्तीत्युपपद्यते ॥

यदन्तर्ज्ञेयरूपं तु बहिर्वदवभासते ।

सोऽर्थः

[7] Lit. अणुत्वसदृशः

[8] =zlum. po.

[9] More lit. सम्बन्धिनि अपनीतेऽपि ; or सम्बन्धिन अपनयेऽपि.

बाह्यार्थेऽविद्यमाने अन्तस्सदेव बहिर्वदवभासनमालम्बनप्रत्ययः ।

विज्ञानरूपत्वात्तत्प्रत्ययतयापि च ॥ ६ ॥

अन्तर्विज्ञान [10]मर्थतयावभासते [11]ततो उत्पद्यते चेति धर्मताद्वय-विशिष्टमित्यतः अन्तस्सदेवालम्बनप्रत्ययः ॥

यदि तावदेवमवभास एव वेद्यतं । कथं तदेकदेशः सहजातः प्रत्ययः ।

एकांशः प्रत्ययोऽवीतात् .

सहभूतोऽपि अव्यभिचारात् [12]अन्यजातस्य प्रत्ययो भवति ॥ नैयायिकास्तु एवमाहुः । क्रमेण जायमानयोर्हेतुहेतुमतोः भावाभावतद्वत्ता लक्षण[13] मिति ॥ [14]अथवा

शक्त्यर्पणात् क्रमेण [वा] ।

क्रमेणापि सोऽर्थावभासः [15]स्वानुरूपकार्योत्पत्तये शक्तिं विज्ञानाधारां करोतीत्यविरोधः[14] ॥ यदि तर्हि स्वरूपं[16]मेवालम्बनप्रत्ययः । कथं तत् [रूपं] चक्षुश्चोपादय चक्षुर्विज्ञानमुत्पद्यते [इति] ।

[10] Or. अर्थः अवभासते.

[11] =अर्थात्. cf. Vṛtti ad 2*a*.

[12] Lit. अन्यस्मात् जातस्य.

[13] Cf. Nyāyasūtra, IV, 1, 49: प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा कस्मादुत्पाद-व्ययदर्शनात्.

[14] The passage, अथवा . . . अविरोधः is quoted in the Tattvas. pañ. p. 582. The pañjikā cites this passage omitting the words क्रमेण वा in the quarter *b* of the verse 7.

[15] Xylograph reads स्वभासानु—, raṅ. snaṅ. ba—.

[16] raṅ. gi. gzugs.

सहकारिवशाद्यद्धि शक्तिरूपं [तत्] इन्द्रियम्[16a] ॥ ७ ॥

इन्द्रियं स्वकार्यात् शक्तिरूपमेवानुमीयते न तु भौतिकम् ।

सा चाविरुद्धा विज्ञप्तेः

[17]शक्तिस्तु विज्ञाने वास्तु । अनिर्देश्यं स्वस्य[18] रूपे वास्तु कार्योत्पत्तौ न विशेषः ।

एवं विषयरूपकम् ।

प्रवर्तेतेऽनादिकालं शक्तिश्चान्योन्यहेतुके ॥ ८ ॥

चक्षुराख्यां शक्तिमन्तः[19]रूपञ्चोपादाय विज्ञानमर्थावभासि आलम्बनादविभक्तमुत्पद्यते । इदं द्वयमपि अनादिकालमन्योन्यहेतुकम् । कदाचित् विज्ञानस्य शक्तिपरिपाकात् विषयाकारता भवति । कदाचिच्च तदाकारशक्तिः[20] । विज्ञानं सा च उभयमन्यत्वेनानन्यत्वेन च यथेष्टमुच्यताम् । एवमन्तरालम्बनं[21] धर्मताद्वयविशिष्टत्वात् विषयतया उपपद्यते ॥

इत्याचार्यदिङ्नागकृता आलम्बनपरीक्षावृत्तिः समाप्ता

[16a] Cf. Madhyamakāvatāra, Sanskrit text VI, 62 and bhāṣya thereon.

[17] =nus. pa. ni. Xylograph omits it.

[18] Or. स्वरूपे=raṅ. gi. ṅo. bo. la.

[19] =naṅ. gi. gzugs.

[20] =de. hi. rnam. pahi. nus. po.

[21] Better reading will be अन्तर्विज्ञानं. Cf. vṛtti ad 6c-d.

PARAMĀRTHA'S CHINESE VERSION

अनाकारचित्ताविषयशास्त्र

१. यद्यप्युच्यते अणुः इन्द्रिय [विज्ञप्तेः] कारणम् असरूपत्वात् अक्षवन्न विषयः ।

२. विज्ञप्तिः संघाताभा भवति न तस्माज्जायते । संघातोऽसद्रूपः द्विचन्द्रवत् । अनेन द्वौ बाह्यार्थौ न विषयौ ।

३. केचिद्वदन्ति । अणवः संभूय पदार्थसाधनानि विषयाः सिध्यन्ति, विज्ञानस्य तदाभत्वात् । अणुस्वरूपं द्रव्यसदपि न विषयः [1]रजोवत् विज्ञानासरूपत्वात् ।

४. अणुर्विषयश्चेत्, तदा विज्ञप्तिरभिन्ना [स्यात्] । यद्याकारभेदं वदसि तदा विज्ञप्तिर्विषमा [स्यात्] । आकारभेदः प्रज्ञप्तिस्थः । अत आकारो न तथ्यः ।

५. अणुप्रमाणं सर्वत्राभिन्नम् । यद्यणून् परिहरसि, विषयविज्ञप्तिं नोदियात् । तस्मात् विषयाः प्रज्ञप्तिनामानि ।

[1] Chén=dust. dirt, This character is also used for विषय. But in the corresponding passage of the vṛtti of Paramārtha's and Hsuan Chuan's versions, the character 'chien' is used which exactly corresponds to कठिनता of the Tibetan. So 'chén' is, I think, a mistake for 'chien'=कठिनता.

६- अन्तर्विषयरूपं बहिर्वदवभासमानं विज्ञप्तिविषयः सिध्यति। विज्ञानस्य दृश्याकारत्वात् इदं विज्ञानमालम्बनप्रत्ययः।

७. उत्पत्तिनैयत्यात् युगपत [प्रत्ययः] सिध्यति। क्रमेण वा शक्तिं जनयति। [2]द्वितीयमिन्द्रियं—सहजातशक्तिविशेष इन्द्रियं भवति।

८. विज्ञानस्याप्रतिघः[3]। अन्योन्यहेतुके शक्तिविशेषविषयात्मके अनादिकालमन्योन्यप्रवृत्ते॥

---

[2] There are two kinds of sense organs, *sthūla* and *sūkṣma*. The latter seems to be meant here.

[3] =अविरोधी.

PARAMĀRTHA'S CHINESE VERSION

अनाकारचित्तविषयशास्त्रम्

१. ये केचित् स्वीकुर्वन्ति चक्षुरादिपञ्चविज्ञानानि बाह्यमर्थं प्रतीत्य उत्पद्यन्त इति। ते कल्पयन्ति परमाणुं वा विषयम्। विज्ञानहेतुत्वात्। परमाणुसङ्घातं वा विषयम्। सङ्घाताभविज्ञानस्योदयात।

विषय इति किंलक्षणः। [4]यत् विज्ञानविज्ञापकम्। तल्लक्षणः। यथा तल्लक्षणं विज्ञानमुदेति। तस्मात्स विषय उच्यते। परमाणु नैतद्वृत्तिः।

HSUAN CHUANG'S CHINESE VERSION

आलम्बनप्रत्ययपरीक्षाशास्त्रम्

१. केचित् चक्षुरादिपञ्चविज्ञानानां बाह्यरूपमालम्बनप्रत्ययं कुर्वन्तः परमाणुं वा कल्पयन्ति वस्तुत अस्तीति। विज्ञानजनकत्वात्। सङ्घातं वा गृह्णन्ति। जायमानविज्ञानस्य तदाकारबन्धात्। उभयमपि न युक्तम्। कस्मात्।

अणुः पञ्चविज्ञानानां
कारणमपि नालम्बनम्।
तदाकारविज्ञानाभावात्
चक्षुरक्षादिवत्॥

आलम्बनप्रत्ययो यदुत तदाकारबद्धविज्ञानजनकप्रत्ययः। वस्तुरूपश्च जनकप्रत्ययो भवति। विज्ञानं तमपेक्ष्य जायते। रूपादिपरमाणुर्यद्यपि वस्तुरूपः आलम्बन[2]कारवि-

PARAMĀRTHA'S CHINESE VERSION

यत्परमाणुद्रव्यम् इदं विज्ञानकारणम् । पञ्चेन्द्रियवत् । तस्मान्न विषयः परमाणुः ।

२. तथा चेत् परमाणुसङ्घातो विषयः स्यात् । यथासङ्घातं विज्ञानोदयात् । यद्यपि पुनरेवं [5]तदाकारमुदेति । विज्ञानं न तस्माज्जायते । तस्मात् सङ्घातोऽपि न विषयः । कस्मात् । विषयश्चेत्, तदाकाराभविज्ञानजनको विषय आस्थेयः । कस्मात् । अयं हि विषयो वक्तव्यो विज्ञानोत्पत्तिप्रत्ययत्वात् । सङ्घातस्तु नैवम् । अद्रव्यसत्त्वात् द्विचन्द्रवत् । संक्षुभितचक्षुरिन्द्रियस्य द्विचन्द्राभविज्ञानमस्ति । न [तु] चन्द्रद्वयम् । विज्ञानगोचरस्य द्रव्यतोऽभावात् । सङ्घातोऽप्येवम् । परमाणून् विहाय द्रव्यं नास्तीति सङ्घातो न विज्ञानगोचरः । तस्माद्बाह्यविषयः—द्वावर्थौ,

HSUAN CHUANG'S CHINESE VERSION

ज्ञानजनकः तथापि नालम्बनम् । चक्षुरक्षादिवत् । चक्षुरादौ तदाकारविज्ञानाभावात् । एवं परमाणुश्चक्षुरादिविज्ञानस्य नालम्बनम् ।

२. सङ्घातः पञ्चविज्ञानाना-
मालम्बनमपि न प्रत्ययः ।
तद्द्रव्याभावात्
द्वितीयचन्द्रवत् ॥

रूपादिसङ्घातः यद्यपि आलम्बनीक्रियते । चक्षुर्विज्ञानादीनां तदाकारकत्वात् । तथापि न प्रत्ययः । संक्षुभितनेत्रदृष्टद्वितीयचन्द्रवत् । तस्य द्रव्यतो नास्तीत्यकारणत्वात् । एवं सङ्घातश्चक्षुरादिविज्ञानानां प्रत्ययो न भवति । अतो बाह्यौ द्वावर्थौ आलम्बनप्रत्यययौ मिथ एकाङ्गविकलौ । अत एव न युक्तौ ।

Paramārtha's Chinese Version

न विज्ञानगोचरः । द्वयो र्विकलाङ्गत्वात् ।

३. केचिदाचार्या वदन्ति । अणवः सञ्चिताः पदार्थसाधनानि बह्वाकारसंपन्नाः । तान् गोचरं सधायामः । कस्मात् । आकारान्तरयुक्तः प्रत्यक्षजनकः । न केवलः परमाणुः परमाणुसङ्घातश्च । तस्मात परमाणौ परमाणुसङ्घाते च अस्त्याकारः [यः] षड्विज्ञानानां विषयः क्रियते । आण्वाकारो न विषयः कठिनतादिवत् । परमाणौ सन्ति काठिन्यशीतोष्णप्रयत्नस्पर्शाः । ते च द्रव्यसन्तो न चाक्षुषविज्ञानगोचराः । चाक्षुषविज्ञानस्य अतादृशत्वात् । परमाणुवर्तिपदार्थ [आकार] श्चैवम् ।

Hsuan Chuang's Chinese Version

३. केचित् गृह्णन्ति रूपादीनां प्रत्येकं बह्वाकाराः सन्ति । तत्र एकाकारः प्रत्यक्षविषयः । अतः परमाणूनामाकारसमृद्धानामस्ति प्रत्येकं सञ्चिताकारः । अयमाकारो द्रव्यसन् प्रत्येकं [तद्-] आकाराभमिज्ञानोत्पत्त्यारम्भक इति पञ्चविज्ञानानामालम्बनप्रत्ययीक्रियते । इति । तदपि न युक्तम् । कस्मात् ।

सञ्चित[ाकार]ः कठिनतादिवत्
चक्षुरादिविज्ञानानां ।
प्रत्ययोऽपि नालम्बनम्
अण्वाकाराभ्युपगमात् ॥

यथा कठिनताद्याकारः यद्यपि वस्तुसन् चक्षुरादिविज्ञानानां प्रत्ययभावं भजते । तथापि नालम्बनम् । चक्षुरादिविज्ञानेषु तदाकाराभावात् ।

Paramārtha's Chinese Version

४. कस्मात् । पदार्थमध्यवर्ती परमाणु र्यदि विज्ञानजनकः । तदा इदं विज्ञानं न भिद्येत । पदार्थ-मध्यवर्तिपरमाणुभेदाभावात् । यदि वदसि आकारभेदात् विज्ञानभेदो जायते । घटादिपदार्थाश्च न समाः । तदाकारकारणत्वात् जायमानं विज्ञानं भिद्यते । इति । अयमर्थो न युज्यते । कस्मात् । तादृशाकारभेदाः घटादि-प्रज्ञप्तिपदार्थवर्तिनः न तु [6]परमाणु-द्रव्यवर्तिनः ।

Hsuan Chuang's Chinese Version

रूपादिपरमाणूनां सञ्चिताकारेऽपि युक्तिस्तथैव । तस्य सर्वथा अण्वा-कारतया ग्रहात् ।

४. चक्षुरादिविज्ञानकारणपरमा-णुसञ्चिताकारवादे पुनरस्ति दो-षान्तरम् ।

घटश[3]रावादिमतिः
तद्वहन्ती अभिन्ना स्यात् ।
नाकारभेदाद् भेदः
आकारभेदस्याद्रव्यत्वात् ॥

घटशरावादिमहदल्पादिपदार्थसाधन - परमाणुषु बहुषु अल्पेषु वा सा-म्यात् तत्कारणा मतिरभिन्ना स्यात् । तत्पदार्थाकारभेदाद्बुद्ध्याकारभेद इति वदसि चेत् । न तथा युक्तम् । ग्रीवाद्याकारभेदः केवलं घटादिप्रज्ञ-प्तिधर्मेऽस्ति । न तु परमाणुषु । अतस्तन्न ग्राह्यं परमाणवोऽपि भिन्ना-कारा इति ।

PARMĀRTHA'S CHINESE VERSION

५. ⁶अणुप्रमाणस्य भेदाभावात्। पदार्थस्थपरमाणुप्रमाणं यत्पारिमाण्डल्यं [तत] अभिन्नम्। तस्मात् पदार्थानामाकारा न वस्तुसन्तः। [किन्तु] प्रज्ञप्तिसन्तः। घटादिपदार्थाश्च प्रज्ञप्त्याकारा इत्युच्यन्ते।

अणूनां परिहारे घटाद्याकारविज्ञानस्यानुत्पत्तेः। द्रव्येषु संयुक्तधर्मा भग्नाश्चेत् [तदापि] द्रव्याकारविज्ञानं न नश्यति। अभग्नकाल इव घटे पञ्चविषयविज्ञप्तिर्जायते। भग्नार्थे पञ्चविषयविज्ञप्तेरनष्टत्वात् पञ्चविषयादयो द्रव्यसन्तः। अनेन अणुसङ्घातपदार्थौ न विज्ञप्तिजनकौ। तस्माद्बाह्यविषयो न विज्ञानगोचरः।

६. तथा चेत् को धर्मो विषयः। [illegible]विषयत्वं बहिर्वदवभासनं। अयं विज्ञानविषय इत्युच्यते। बाह्यविषये वस्तुतोऽविद्यमाने, अन्तर्विज्ञाने स-

HSUAN CHUANG'S CHINESE VERSION

५. अणुप्रमाणसाम्यात्

आकारभेदः प्रज्ञप्तिमात्रम्।

अणुशस्तस्य भेदे

तद्बुद्धित्यागनियमात्॥

न घटशरावादिनिष्पादकपरमाणूनामाकारपरिमाणं भिद्यते। पारिमाण्डल्यलक्षणं हीयेत। अतो ज्ञायते विभिन्नाकारः प्रज्ञप्तिस्थो न द्रव्यम् इति। विभिन्नाकारः पुनः परमाणुशो भज्यते [चेत्] तद्बुद्धिर्नियमेन त्यज्यते। न नीलादेरणुशो भञ्जने तद्बुद्धिस्त्यज्यते। अस्मात् आकारभेदः संवृतिसन्मात्रम्। न नीलादिवत् द्रव्यस्थः। तस्मात्पञ्चविज्ञप्तीनामालम्बनप्रत्ययो न बाह्यं रूपादि इतीदमुपपत्त्या संपन्नम्।

६. ननु तदालम्बनप्रत्ययः सर्वथा नास्ति। नैव सर्वथा नास्तीति। तथा चेत् किम्।

PARAMĀRTHA'S CHINESE VERSION

त्वानां मुग्धचित्तविकल्पात् षड्विषय-
विकल्पः प्रवर्तते । अयं विकल्पो
यथा बहिर्वर्तते तथा अवभासते ।
चतृषु प्रत्ययेषु अयं नाम विज्ञानाल-
म्बनप्रत्ययः । अस्य विज्ञानरूप-
त्वात् अस्माद्विज्ञानस्य जननात् ।
कस्मात् । इदं विज्ञानं, अन्तर्विषय-
रूपं भवति[5] अन्तर्विषयाज्जायते इति
धर्मद्वयसंपन्नम् । तस्मादन्तर्विषयो
गोचर आख्यायते ।

७. पृच्छयते । यथाविषयं वि-
ज्ञानं संभवति इतीदमेव युक्तम् ।
अन्तर्विषयोऽयं विज्ञानैकदेश एक-
काल उत्पन्नः कथमालम्बनप्रत्ययो
भवति[8] । उच्यते । आलम्बन-
प्रत्ययः सिध्यति । इति । आलम्बन-
प्रत्ययोऽयं संभवति अद्विधाभावात् ।
प्रत्यय इति । कदाचित् एककाल
उत्पन्नोऽपि अन्यजातस्य धर्मान्तरस्य
साधनम् । उत्पत्तिविनाशयो[9] र्निय-
तानुबन्धित्वात्[10] । पृच्छयते । क्रमेण

HSUAN CHUANG'S CHINESE VERSION

अन्तः रूपं बहिर्वेदवभासमानं
विज्ञानालम्बनप्रत्ययः ।
तदाकारो विज्ञानवर्ती
विज्ञानजनकश्च इत्यभ्युपगमात् ॥
बाह्यविषयो यद्यप्यसन् । तथाप्यस्ति
अन्तः रूपं बहिर्विषयाकारमवभास-
मानमालम्बनप्रत्ययः । चक्षुरादि-
विज्ञानं तदाकारबद्धं प्रवर्तते तत
उत्पद्यते च इति धर्मद्वययुक्तमित्य-
भ्युपगमात् ।

७. अयमन्तर्विषयाकारः विज्ञा-
नादविभक्तः । विज्ञानकारणप्रत्ययः
कथं भवति ।

सहवृत्तिनैयत्यात्
युगपदपि कारणप्रत्ययः ।
पौर्वापर्येण वा प्रत्ययः
तच्छक्तचर्पणात् ॥

विषयाकारो विज्ञानेन सहवृत्तिनै-
यत्यात् यगुपज्जातोऽपि विज्ञान-
कारणप्रत्ययः । नैयायिका आहुः ।
यद्ययं तेन असहवर्ती भवति ।

PARAMĀRTHA'S CHINESE VERSION

जातयोः कथमालम्ब्यालम्बनरूपम्। उच्यते। हेतुः पूर्वं चेत् पश्चात् फलम्। फलं हि हेत्वनन्तर-भावि[11]। न तु हेतुः फलानन्तर[11] भावी। हेतोस्सफलत्वे अवश्यं सत्ता। हेतोर्निष्फलत्वे अवश्यमसत्ता। फलं हेत्वनन्तरभावि[11] सद्वा असद्वा। इदमाख्यायते हेतुफलरूपम्।

HSUAN CHUANG'S CHINESE VERSION

युगपज्जातयोरपि [न] कार्यकारणभावो लभ्यते।

PARAMĀRTHA'S CHINESE VERSION

अथ वा शक्त्यर्पणात् क्रमेण आलम्ब्यालम्बन [रूपं] सिध्यति। विषयाकारं विज्ञानं क्रमेण उत्पद्य उत्पादयति। कार्यानुरूपशक्त्युत्पादनेन विज्ञानधारामुत्पादयति।

HSUAN CHUANG'S CHINESE VERSION

अथ वा पूर्वं विज्ञानाकारः पश्चाद्विज्ञानप्रत्ययो भवन् मूलविज्ञाने स्वानुरूपकार्योत्पादकशक्त्यर्पणादुत्पादयति। इति युक्त्यविरोधात्।

PARAMĀRTHA'S CHINESE VERSION

पृच्छ्यते। यद्यन्तर्विषयो विज्ञानालम्बनप्रत्यय उत्पत्तिकारणम्। कथं सूत्रं व्याख्यातव्यम्। सूत्रमाह[12]। चक्षूरूपञ्च प्रतीत्य चक्षुर्विज्ञानमुत्पद्यते। इति विस्तरः। उच्यते। कार्यसहकारिशक्तिस्वरूपमिन्द्रियमुच्यते।

HSUAN CHUANG'S CHINESE VERSION

यदि पञ्चविज्ञानानि केवलमन्तः रूपं प्रतीत्य जायन्ते। कथं पुनरुच्यते चक्षुरादिः प्रत्यय इति।

PARAMĀRTHA'S CHINESE VERSION

आह । इन्द्रियं किंस्वरूपम् । उच्यते । शक्तिविशेषस्वरूपम् । तत्स्वरूपं केन कारणेनानुमीयते । स्वकार्यात्तच्छक्तिविशेषरूपं विज्ञायते । न चतुर्महाभूतरूपम् ।

८. सा शक्तिर्विज्ञानस्य अविरुद्धा । सा शक्तिर्विज्ञाने वर्तते विज्ञानविभक्ता । अनिर्देश्यं वा तत्स्वरूपम् । यथा मया साधित मिन्द्रियं भवता साधित मिन्द्रियञ्च शक्त्यात्मकं समम् । तयोः को भेदः[13] । एवं शक्तिर्विषयाकारावभासश्च अन्योन्यहेतुकौ । तथा शक्ति विषयाकारावभासश्चोत्पद्य अनादिकालात्तथा आगच्छतः । इन्द्रियाख्यशक्तिमाश्रित्य अर्थाख्यमन्तर्विषयरूपञ्च प्रतीत्य संक्षुभितं विज्ञानमनिर्देश्यरूपम् । अयं धर्म अन्योन्यहेतुकः अनादिकालञ्च प्रवर्तते । कस्मात् । कदाचित् शक्तिपरिपाकात् विज्ञानं विषयाकारं

HSUAN CHUANG'S CHINESE VERSION

८. विज्ञाने शक्तिरूपाणि
इन्द्रियाणि युज्यन्ते ।
शक्तिर्विषयश्चाना-
दिकालमन्योन्यहेतुकौ ॥

विज्ञानारम्भानुमानेन ज्ञायते इन्द्रियमस्तीति । तत् केवलं शक्तिः न तु बाह्यकृतमिति । अतो मूले विज्ञाने पञ्चशक्तिरूपाणि चक्षुरादीन्द्रियाणि आख्यायन्ते । [इतीदं] न युक्तिविरुद्धम् । शक्तिर्विज्ञानारम्भन्यायाभेदात् विज्ञानवर्तिनी अन्यवर्तिनी वा । अनिर्देश्यापि [वा] । बाह्यधर्मत्वे युक्त्यभावात सा विज्ञानवर्तिनी नान्यवर्तिनी इति नियमेनाभ्युपगन्तव्यम् । तच्छक्तीन्द्रियं पूर्वविषयरूपञ्च अनादिकालादन्योन्यहेतुके ।

PARAMĀRTHA'S CHINESE VERSION	HSUAN CHUANG'S CHINESE VERSION
प्रवर्तने । कदाचित् विषयाकारविज्ञानाच्छक्तिः सिध्यति । विज्ञान मुभयभिन्नं वा उभयाभिन्नं वा अनिर्वाच्यं वा । एव मन्तर्विषयो धर्मद्वयविशिष्टत्वात् विज्ञानगोचरो भाव्यः ॥	तथाहि । सा शक्तिः परिपाकप्राप्ता विज्ञाने पञ्चान्तर्विषयरूपाणि अवभासयति । इमानि अन्तर्विषयरूपाणि पुनः पाकान्तरेण विज्ञाने पञ्चेन्द्रियशक्तीरर्पयन्ति । इन्द्रियविषय[स्य]रूपद्वयं विज्ञानाद् भिन्नमभिन्नं वेति[3a] यथेष्टमुच्यताम् । एवं विज्ञानानामन्तर्विषयाकार एवालम्बनप्रत्यय इत्युपपत्त्या निपुणं साधितम् ॥
अनाकारचित्तविषयशास्त्रम्	आलम्बनप्रत्ययपरीक्षा शास्त्रम्

[1] Lit. यदि.

Lit. यथा तदाकार॰.

The chinese text has a negative particle 'wu', just before these two words. It is to be omitted to make the sense more correct.

No case sign in Chinese

Lit. क्रियते.

Lit. अनुत्पत्ति.

[10] Or—अनुरुद्धत्वात्.

[11] Lit. हेत्वनुमाग्नि.

[12] Cf. Madhyamakavṛtti, ed. L. V. Poussin, p. 6, l. 3 with note thereon.

[13] न कोऽपि भेदः इति शेषः ।

[1] Lit. ॰नानि उद्दिश्य.

Lit. आलम्बनभात्रभाग्विज्ञान॰.

[3] =ou=bowl.

[3a] To put more literally this phrase ॰रूपद्वय. विज्ञानेन एक मन्यद्वा, अथवा नैक नान्यद्वा॰.

CORRECTIONS AND ALTERATIONS

IN THE COMMENTARY OF DHARMAPĀLA

Page 21	line 7-9	Read	तत्र आदिवचनं परसंमतं रूपेन्द्रियाश्रय-पञ्चविधविज्ञानं संगृह्णाति ।
,, ,,	,, 11	,,	यद्यपि मनोविज्ञानमवयविद्रव्यप्रत्ययमङ्गी क्रियते ।
,, 22	,, 4	,,	स्वसमुत्पत्तौ for स्वसंततौ
,, ,,	,, 6	,,	इन्द्रियविज्ञानाहृतभाव्यं मनोविज्ञानम्
,, ,,	,, 12	,,	चक्षुरादिविज्ञानानां रूपमाश्रयपत्ययः सत आयतनं भवति ।
,, 23	,, 14	,,	स आलम्बनार्थः यः प्रत्ययेषु विज्ञानस्य उत्पादकहेतुः इति ।
,, ,,	,, 20	,,	यत् विज्ञानं यदाकारयुक्तं . . .
,, 24	,, 4	,,	धर्मिणः स्वरूपविरोधदोषः स्यात् । तथा धर्मवचनमप्रसिद्धम् ।
,, ,,	,, 8	,,	तदाकारयोगो हेतु र्भवेत् ।
,, 25	,, 2	,,	स्वरूपं स्वाकार उच्यते । निर्धार्यते निश्चीयते ।
,, ,,	,, 16	,,	यदि यथोक्तमेव कारणं . . .
,, 26	,, 1	,,	तथा चेत् आह for यद्यप्येवम् . . .
,, 28	,, 1	,,	य एव जनकः स एव . . .
,, ,,	,, 2-3	,,	स एव . . . व्यवह्रियते ।
,, 32	,, 4	,,	सञ्चितात्मकाः । अतो न द्रव्यसन्तः . . .
,, 35	,, 17	,,	परमाणूनां बहुत्वेऽपि अविशेषात्, इन्द्रिय-विज्ञानानान्तु विशेषाकारत्वात् ।
,, 38	,, 11	omit	"। अनेन"

आलम्बनपरीक्षाव्याख्या*

आचार्यधर्मपालकृता

दुर्मेधसां प्रज्ञां प्रदीपयितुं दोषावरणं तिरस्कर्तुञ्च यो[1] जगाद[2] । [तं] प्रणम्य अयमर्थः परीक्ष्यते ॥

चक्षुरादिविज्ञानानां [. . .] कल्पयन्ति । इति ।

हेयस्य हानमुपादेयस्य वोपादानं परीक्षाफलम् । अतो हेयार्थस्य [त]द्विपरीतस्य च हेतुः प्रदर्श्यते । तत्र स्वयूथ्या वदन्ति । यत् रूपं चक्षुश्चाश्रित्य पञ्चविधविज्ञानानि [भवन्ति] इति परे कल्पयन्ति । [तत्] संगृह्णीम इति । परे तानि [3]एकोन्मुखानि वस्तुप्रत्ययानि इति प्रतिपद्यन्ते । अतो मनोविज्ञानं न युक्तम् । एकोन्मुखत्वाभावात् रथादि-[वत्] संवृतिमत्प्रत्ययत्वाभ्युपगमात् । यद्यपि मनोविज्ञानं गोचरं वस्तु प्रतीत्य साकारम्[4] । [तथापि] विज्ञानाकारविहीनमतद्विषयमपि गृह्णाति । चक्षुरादि-विज्ञानस्य अविनाभूतः [5]प्रसिद्धो विषयः आकारः[6] सिद्धः । तस्मात् नास्य

* This commentary has been rendered into Sanskrit from the Chinese version of I-Ching.

[1] Lit. यदि.

[2] Lit. गदितुं शक्तः

[3] =नियतस्वभावपदार्थगोचराणि.

[4] Lit. सावयवम् .

[5] Or अविनाभूतो विषयः प्रसिद्धय (or सिद्धिं लब्ध्वा), etc.

[6] Lit. प्रदेशः=fang.

[7]मर्यादा प्राप्यते। किञ्च अभ्यासज्ञान[8]बोध्यरूपतत्त्वस्य तर्कागोचरत्वात् दृश्यवत् प्रतिष्ठितत्वाच्च इहेदं [तत्त्वं] श्रवणमननभावनाजन्यज्ञानमात्र-विषयः। तथा मनोविज्ञानालम्बनार्थोऽत्यन्तमभावः सिध्यति। अस्य स्व-सन्ततावशक्तप्रत्ययत्वात्। गतानागतप्रत्ययग्रयोः पुनरवस्तुत्वात् असंस्कृतवत्। तदर्थमादिवचनं पञ्चविज्ञानकायसंग्राहकम्।

तर्हि इन्द्रियविज्ञानगृहीतं सर्वं मनो विजानाति। इति चेत्। तदपि कथम्। नैतदिन्द्रियविज्ञानसमकालम्। अनन्तरं वा। रूपाद्यालम्बनस्य निरुद्धत्वात्। न वा वर्तमान [आलम्बन] प्रत्ययः। इन्द्रियविज्ञानगृही-तत्वात्। तन्मनोविज्ञानं स्वतो बाह्यार्थग्रहणस्वभाव[श्चेत्]। तदा बधि-रान्धादीनामभावः स्यात्। अनुमानविरोधि च इन्द्रियान्तरम्। अधिकरूप-निराकरणस्य इष्टत्वात्। तथा मनोविज्ञाने न पुनराग्र[9]हः। चक्षुरादि-विज्ञानानि [10]रूपमाश्रित्य [11]आकारवन्ति। अनावरणमक्रियास्वभावमात्रम्। अतोऽभावः स्वयमभ्युपगम्यते। तथैव [12]करणं मनः। तदालम्बनं [13]प्रत्यक्षभावि। ग्राह्यस्वभावत्वेन अत्यन्तविषमगतित्वात्। तदालम्बनता-निराकरणं सम्यक् मन्यामहे। तेन च तदाश्रयतानिराकरणम्। सम-कालीनशक्तिरूपेन्द्रियं तत्कल्पयिष्यति[13]। अथापि आह।

बाह्यार्थ इति।

[7] Or व्यवस्था.

[8] Lit. अभ्यासकार्यज्ञान.

[9] tsun-huai, to preserve and cherish.

[10] Lit. रूपाश्रयप्रत्ययानि.

[11] Lit. प्रदेशवन्ति.

[12] pen=root, मूल, etc.

[13] The translation (तदालम्बनं . . . कल्पयिष्यति) is tentative.

एतद्व्यतिरिक्तमर्थान्तरमस्तीति गृह्यते। तत् तद्विपरीतं प्रकाशयति। प्रकाशितश्च सोऽर्थान्तरग्रहणयोग्यत्वात् अर्थ इति उच्यते।

कथमुच्यते समग्रीं प्रतीत्येति। न हि सामग्री द्रव्यं युज्यते। [यत्तर्हि] तथागतसत्यं दूष्येत इति। तत् स्वतः पूर्वोत्तरयुक्तिविरुद्धम्। मम तु का हानिः। द्रव्यं सामग्रीञ्च प्रतीत्य इति स्वीकृतत्वात्। दोषान्तरमपि विवक्षितं स्यात्। अतोऽयं दोषोऽपि परिह्रीयते।

परमाणुं वा कल्पयन्ति। इति।

यद्यपि परमाणुः समद्‌यमात्रनिरुद्धो दृष्टः। तथापि द्रव्यद्वयं प्रत्ययः न सङ्घातः। यथा रूपादीनि इन्द्रियाणां वर्तमानविषया अपि असंकीर्णाः। इन्द्रियशक्तेः प्रतिनियतत्वात। नष्टेऽपि द्रव्ये सत्तासमर्थं द्व्यणुकमालम्बनं सिध्यति।

तत्कारणत्वादिति।

तस्य चक्षुरादिविज्ञानस्य कारणत्वात। तद्धि अवयवार्थसन्निकर्षसमुत्थम्। तथाचाहुः। तदालम्बनार्थो विज्ञानस्य जननहेतुः सर्वप्रत्ययवृत्तित्वात्।

तत्सङ्घातं वा। इति।

तद्वादिनो वदन्ति। परमाणुभाव्यसमुदायस्तदालम्बनमिति।

तदाभविज्ञानस्य जायमानत्वात्। इति।

सङ्घातस्य एतद्ज्ञानजननात् निश्चीयते स आलम्बनमिति। यथाह कश्चित्। [14]'यत् विज्ञानं तदाकारयुक्तं, सोऽस्य विषय इति। इमौ

[14] Lit. यदि

द्वौ वादिनौ आहतुः । तदाकारयुक्तत्वहेतुर्नोच्यते । हेतुत्वादिसाधनहेत्वादेरिव अस्य हेतोर्दृष्टान्तो नास्तीति चेत् । परमाणुसामान्यलक्षणमालम्बनं तत्साधयति । न च विज्ञानस्य बहिर्द्रव्यं प्रत्ययः । इति यदि स्व[पक्षं] स्वीकरोषि । [तदा] धर्मिणां स्वलक्षणविरोधः[15] स्यात् । तथा न धर्मानुशंसनं प्रसिध्येत् । यत् इदं परस्य संमतं तदेव दृष्टान्तीक्रियते । इति यथोक्तमेव इति चेत् । साध्येऽपि तत्समानम् । इति । प्रमाणाप्रमनस्कस्तु आह । वादमूलं हेतुद्वयं येन हेतुना विदितम् । साधारणसिद्धदृष्टान्ताभावात् नैवास्त्ययं हेतुः । अतः केन तथा तदाकारयोगहेतुर्भवेत् ।

अथ पुनः स्ववादस्य युक्तिरव्यभिचारिणी प्रदर्शयिष्यते । पञ्चमीविभक्तिनिर्देशेन परसंमतिः प्रकाशिता ।

यद्यपि कारणम्[16] । इति ।

यथासंमतम् । [17]अनुपलभ्यमानपदार्थस्य असत्त्वात् परमाणुरकारणम् । किन्तु परमाणुकायस्य तत्कारणता तथापि केवलमसंयुक्तस्य आलम्बनता उच्यते ।

तदाकार[विज्ञान]भावात् । इति ।

परमाण्वाकार इत्येतदाह ।

इन्द्रियविज्ञानस्य परमाणुर्न विषयः अक्षवत् इति ।

यथा इन्द्रियं विज्ञानसंनिकर्षाश्रयहेतुरपि न तद्विषयः । अनिन्द्रियाकारत्वात् । तथा परमाणुरपि । अतदाकारा न तद्विषया इति यत् । तदर्थमाह ।

[15] Lit. विरोधदोषः

[16] Kar. 1, a-b.

[17] Lit. अविद्यमान॰

स विषय इत्यादि ।

स स्वभावो यदुत स्वसमानाकार[18]प्रत्यायननिर्धारणम् । कथं पुनस्तत्प्रतीयते ।

तदाकारतया[19] जायमानत्वात् इति ।

एतन्मनो वचनम् । तदाकारसरूपं विज्ञानमुदेति । [यत्] [20]तदानुरूप्यं तत्तु तद्विषयप्रत्यायनमुच्यते । वस्तुतो विज्ञानं विना विज्ञेयान्तरस्यासतः विज्ञानोत्पादकहेतुता कुतः । तथापि अस्त्येव पूर्वं विषयाकारः । स तदात्मनि[21] आदर्शे बिम्बवदर्प्यते । इदमेव तद्विषयप्रत्यायकत्वेन संमतम् । द्व्यणुकस्वरूपं तु विज्ञानाकारं नानुवर्तते । येन परमाणुरपि विषयः स्यात् ।

कारणमपि इति ।

नैतावता कारणमालम्बनम् ।

अक्षवत् इति ।

कारणत्वेऽपि नालम्बनम् । यदि कारणत्वेन आलम्बनं स्वीक्रियते । इन्द्रियमपि एतत्समानं [22]तत् साधयेत् । तदाकारयुक्तत्वहेतोरसिद्धिदोषः पूर्वमुक्त एव इत्युक्तं भवति । तथा च मनो न केवलं कारणतया प्रथते । इन्द्रियतया आलम्बनाकारतयापि । यद्युक्तरीत्या कारणं साधयसि । तदा तस्य कारणत्वात् कथमालम्बनत्वम् । इन्द्रियस्यापि [कारणत्व]मस्ति

[18] Lit. प्रत्येतृ॰

[19] Lit. तदाकारवत्

[20] Lit. तद्रूपानुसरणात्

[21] = विज्ञानात्मनि

[22] = आलम्बनम्

[आलम्बनत्वं स्यात्] इत्यनैकान्तिकदोषः सिध्यति । यद्यप्येवम् । [तथापि नायं दोषः ।]

अतदाभतया इति ।

किमर्थमिदम् । स्वप्रतिज्ञाप्रसाधनार्थम् । न परपक्षदोषकथनमात्रेण स्वार्थः सिध्यति । स्वविज्ञानाकाराजनकत्वात् न विषयः परमाणुश्चक्षुरादिवत् । इति प्रतिपादनार्थमिदं वचनम् । यदि इदं तद्धेतुतावचनम्, शास्त्रकारः परपक्षं पुरस्कृत्य[23] परसाधारणं मतं[24] विशदयति इति भवेत् । तदा परप्रतिषेधे मनः प्रकाश्य सिद्धदूषणः तद्वचनं प्रतिक्षिपेत् । तदैकान्तिकः पक्षः स्वीक्रियते । अनैकान्तिकः परपक्षः असंमतिशङ्की ।

पूर्वं परः अनैकान्तिकदूषणमुत्थापयति । कथं दुष्टं स्वपक्षानुमानं कल्पयसि । प्राकृतजना वदन्ति । व्यभिचारि अनियतमसाधनमिति । तत् संदेहप्रापकम् । तस्मात् अन्यत् प्रमाणं स्थापनीयम् । अतदाभ इतीदं अनिर्धारितस्वभावेषु परमाणुषु कदाचित् स्यात् । यथाकारं विज्ञानमुदेतीति यन्निर्धारणम् । तदभावात् स्पष्टं ज्ञायते निर्धारणस्याप्यस्यानवकाश इति । अनिर्धारितस्वभाववचनौचित्यात् । तत्कारणं नालम्बनमिन्द्रियपरमाणुवत् इति केवलं भवति । अन्येऽपि विज्ञानकरणविशेषाः चक्षुर्विज्ञानसाधनानि प्रथन्ते न पुनः परमाणुस्वरूपप्रत्यायकाः । अतदाकारत्वात् । इन्द्रियविज्ञानवत् विज्ञानान्तराणि वाच्यानि । अक्षवद्वचनं वस्तुतः प्रदर्शनार्थम् । दृष्टान्तान्तरमप्यर्थापत्त्या आपतति । इदं कारणताया वचनमपि अपार्थकम् । इति ।

[23] Lit. पुरःसाधयित्वा

[24] or परसंमतम्

तस्य कारणवृत्तित्वेऽपि नालम्बनता। एवं सार्थकमिदम्। [25]यथा शब्दादिसर्वपरमाणवः अन्येन्द्रियविज्ञानजननकारणानि मा भूवन्निति। कश्चिदाह। विज्ञानस्य स्वरूपमसंज्ञातत्वोपलम्भात् नालम्बनम्। इन्द्रियपरमाणुवत् इति। विज्ञाने विषयाकारार्पणाधीना तदाकारता। इत्ये तदसंभवात् युज्यत एव तस्यासंघानोपलम्भः।

एवञ्च न परमाणव आलम्बनम्। इति कथितम्। तस्य साधनम नाकारत्वात् प्रमाणसंसिद्धाविषयत्वाच्च इति।

तर्हि संघातो विषयोऽस्तु। उक्तभावानां साधनेन यदि पक्षस्थापनं वाञ्छसि [तदा] असिद्धता स्यात् इत्ययं न्यायः[26]।

संघातस्तदाकारयुक्तोऽपि इति।

आलम्बनं भवेत। न कारणत्वम्[27]।

तदाकाराद्विज्ञानं न जायते[28]। इति।

संघाताकारकं [29]संघातविज्ञानम। न स [संघातः] तद्विज्ञानं जनयति। कथमयं तत्प्रत्ययः। आलम्बनलक्षणायोगात् नास्त्यालम्बनार्थः। पूर्वोक्तस्य तु तदाकारयोगोऽसिद्धः। तथा चेत् किमालम्बनलक्षणम्।

सर्वोऽर्थः तत्समानस्वरूपं विज्ञानमुत्पादयतीति युज्यते इति।

[25] Lit. तथा or एवम्

[26] Lit. इत्येवं न्यायतत्त्वम्

[27] Lit. अकारणत्वात्

[28] = यदाभासा न तस्मात सा, Kar. 2, *a*.

[29] Lit. अजनकसंघात॰

विषयविज्ञानमनुसृत्य स एव जनकः स एवालम्बनम् । केचिदाहुः । सर्वोऽर्थश्चित्तचैत्तानां कारणं इत्यवश्यं युज्यते । एत एवोत्पद्य यथाविषयग्रहं शब्देन व्यवह्रीयन्ते । [30]अनादिकालमिमे आलम्बनविषया आख्यायन्ते । [31]यदीदं द्विविधलक्षणं, तद्भागयुक्तमालम्बनं भवति । जनकतायां सत्यामालम्बनार्थः । आगमे उक्तं । अस्मिन् सति इदं भवति इति प्रतीत्यसमुत्पन्नताया अभिधानम् । इति ।

तद्विज्ञानोत्पत्तिकारणमुत्पत्तिप्रत्यय इति अयं तदालम्बनार्थः सम्मतः । स्वलक्षणमुपलभ्यते । नालाधिकमस्ति इत्यतस्तन्नोच्यते ।

संघातो नोत्पादकः, [32]द्रव्याभावात् । इति ।

स संघातो न द्रव्यम् । तस्य संघातिन एकत्वान्यत्वाभ्यामनिर्वचनीयत्वात् । न चाद्रव्यभूतस्य [33]उत्पत्तिक्रियाशक्तिः संभवति ।

द्विचन्द्रवत्[32] । इति ।

यथा द्वितीयश्चन्द्रः न द्वितीयचन्द्रविज्ञानस्योत्पादकः । किं तर्हि तदाकारप्रतिभासकारणम् ।

इन्द्रियवैकल्यात् । इति ।

यदा चक्षुरिन्द्रियं तिमिराद्युपहतप्रकाशकम् । तदा इन्द्रियवैकल्यात् द्विचन्द्रदृष्टिर्भवति न तु वस्तुत्वेन ।

[30] Lit. अनेककाल०

[31] More lit. यद्यर्थः द्विविधलक्षणसंपन्नः तदा तद्भागयोग आलम्बनं नाम भवति.

[32] Kar. 2. *b*.

[33] Lit. उत्पादितफलशक्ति ।०

द्विचन्द्र[दर्शन]स्य तदाभत्वेऽपि न तस्य विषयोऽस्ति ।
इति ।

द्विचन्द्रवत् । तद्विज्ञानस्य तदाकारयुक्तत्वेऽपि अनुत्पादकत्वात् न स विषय आख्यायते ।

[34]'तद्वत् संघातः द्रव्यतोऽसत्त्वेन तद्विज्ञानस्य न कार-
णम् । इति ।

